यस्य हि दत्त्रिमः । स हरेतैव तद्रिक्थं संप्राप्तोऽप्यन्यगोत्रतः” इति मनुवचनैकवाक्यत्वात् । गुणैः जातिविद्याचारैः । “समग्रधनभोक्ता स्यादौरसोऽपि जघन्यजः । त्रिभागं क्षेत्रजो भुङ्क्ते चतुर्थं पुत्रिकासुतः” इति ब्रह्मपुराणदर्शनात् । क्षेत्रजविषय इत्यन्ये । तथा केनापि मुनिना दत्तकस्य बन्धुदायादत्वमन्येन चादायादत्वमुक्तम् तत् गुणवदगुणवद्भेदेन समाधेयम् । पितुरिव बन्धूनां सपिण्डानामपि दायहरत्वाद्बन्धुदायादत्वं पितृमात्रदायहरत्वात् अबन्धुदायादत्वम् “तेषां षड्बन्धुदायादाः पूर्वेऽन्ये पितुरेव षट्” इत्यत्र पितुरेवेत्येवकारस्मरणात् । एवं दत्तकस्य धनग्रहणादौ मुनिभेदेन पूर्वापरोक्तिवैषम्यं गुणागुणविवेकेनापास्तम् । एतेनौरसस्य भ्रात्रादिधने येनैव भ्रातृत्वादिना सम्बन्धेनाधिकारित्वं तादृशेनैव सम्बन्धेन तादृशदत्तकस्यापि यथासम्भवमुचितांशभागित्वमवधेयम् । एवं धनिनः पुत्रान्तरसत्त्वे मृतपितृकस्य दत्तकपौत्रस्यापि दत्तोचितांशभागित्वं तदसत्त्वे सर्वहरत्वमपीति । न च पौत्रस्य स्वपितृयोग्यांशभागित्वनियमात् दत्तकस्य ग्रहीतुः पितामहौरसत्वे तादृशपितृव्यतुल्यस्यैवांशस्य तद्योग्यत्वाद्दत्तकपौत्रः पितृव्यतुल्यमेवांशं लभतामिति वाच्यं पुत्रस्य दत्तकत्वे चतुर्थांशः पौत्रस्य तु तथात्वे समानांश इति वैषम्यात् । ततश्च स्वसमानरूपस्य पितुर्यादृशांशः शास्त्रसिद्धस्तस्यैव स्वपितृयोग्यांशतेति यथोक्तमेव साधु । एवं रीतिः प्रपौत्रेऽप्यनुसर्त्तव्येति । ननु क्षेत्रजदत्तकादीनां सामान्यधनाधिकारित्वेऽपि राज्येऽनधिकारः श्रूयते । यथा “औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च । गूढोत्पन्नोऽपविद्धश्च भागार्हास्तनया इमे । कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा । स्वयंदत्तश्च दासश्च षडिमे पुत्रपांशुलाः । अभावे पूर्वपूर्वेषां परान् समभिषेचयेत् । पौनर्भवं स्वयंदत्तं दासं राज्ये न योजयेत्” । तथा “न क्षेत्रजादींस्तनयान् राजा राज्येऽभिषेचयेत् । पितॄणां साधयेन्नित्यमौरसे तनये सतीति” उच्यते । शास्त्रान्तरसद्भावे विशेषशास्त्रस्य सामान्यपरत्वमेव लाघवात् । अतएव पूर्वपूर्वाभावे परपराधिकारबोधकं हि पूर्ववाक्यं प्रागुक्तनारदादिवचनैकवाक्यतया समग्रराज्यमेव विषयीकरोति परवचनञ्च सत्यौरसे क्षेत्रजदत्तकादीनां समानांशनिषेधकम् असवर्णक्षेत्रजदत्तकादिविषयं वा । अन्यथा वाक्यभेदे गौरवम् । तत्स्वीकारेऽपि नानेन वचनेन क्षेत्रजदत्तकादीनां सत्यौरसे स्वस्वोचितांशो निषिध्यते किन्त्वौरससत्त्वे तेषामभिषेकं निषिध्यौरसस्य राज्येऽभिषेको विधीयते तथा च क्षेत्रजदत्तकादयः सामान्यशास्त्रप्राप्तमंशं लभन्त एव तत्सङ्कोचकाभावात् । न चैतदेव वचनं बाधकं भिन्नविषयत्वात् । अतएव “भागार्हास्तनया इमे” इत्यनेन पूर्ववचने भागार्हत्वं स्पष्टीकृतम् । राज्यातिरिक्तस्य भाग इति न शक्यते वक्तुं राज्यस्यैव तत्रोपस्थितत्वात् पौनर्भवादीनान्तु पूर्वपूर्वाभावेऽपि राज्यनियोजनाभावः पृथगभिधानसामर्थ्यादिति । एतावता प्रबन्धेनाभिहितोऽयं क्षेत्रजदत्तकादीनामौरसेन सह विभागप्रकारः । स तु शूद्रस्य न सम्भवति तस्य तु “दास्यां वा दासदास्यां वा यः शूद्रस्य सुतो भवेत् । सोऽनुज्ञातो हरेदंशमिति धर्मो व्यवस्थित” इति मनुवचनेन “जातोऽपि दास्यां शूद्रेण कामतोंऽशहरो भवेत् । मृते पितरि कुर्य्युस्तं भ्रातरस्त्वर्द्धभागिनम् । अभ्रातृको हरेत् सर्वं दुहितॄणां सुतादृते” इति याज्ञवल्क्यीयेन च दासीपुत्रस्याप्यौरसेन समांशाभिधानेन पितुरनन्तरं भ्रातृरहितस्य तस्यैव दौहित्रेण सह विभागदर्शनेन दण्डापूपायितः सति पितरि क्षेत्रजदत्तकादीनामौरसेन समांशः असति तु तदर्द्धांशः । अन्यथा यत्र च क्षेत्रजदत्तकादीनामौरसचतुर्थांशित्वं तत्र तदपेक्षया अत्यन्तविप्रकृष्टस्य दासीपुत्रस्यौरससमांशित्वमिति महद्वैषम्यं स्यात् । एवं सत्सु क्षेत्रजादिषु सत्योश्च पत्नीकन्ययोर्दौहित्राधिकारे क्रमप्राप्ताधिकारविधिबाधापत्तिः । तेन दौहित्रपर्य्यन्ताधिकारिशृङ्खलायां तदेकतमे सत्यपि न दासीपुत्रस्य सर्वहरत्वं किन्तु तत्समांशः । अतएव “दत्तपुत्रे यथा जाते कदाचित्त्वौरसो भवेत् । पितुर्वित्तस्य सर्वस्य भवेतां समभागिनौ” इत्यपि वचनं शूद्रविषय एव योजनीयम् । तथा “शूद्रस्य तु सवर्णैव नान्या भार्य्योपदिश्यते । तस्यां जाताः समांशाः स्युर्यदि पुत्रशतं भवेत्” इत्यत्र वचने शूद्राणां भार्य्योत्पन्नानां सर्वेषां समांशमभिधाय पुनर्यदि पुत्रशतम् इत्यनेन पुत्रान्तराणामपि समांशता प्रतिपादिता । औरसमात्रपरत्वे पूर्वेणैतत्प्राप्त्या पुनरेतदभिधानं व्यर्थं स्यात् । द्व्यामुष्यायणदत्तकस्य तु जनकप्रतिग्रहीत्रोरुभयोरपुत्रत्वे सर्वरिक्थहरत्वं सत्यौरसे गृहीतस्य तु नांशहरत्वं ग्रहणानन्तरमौरसोत्पत्तौ तु जनकधने तदौरसार्द्धहरत्वं ग्रहीतुरसाधारणदत्तकस्य यादृशोंऽशः शास्त्रीयः तदर्द्ध-